INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

# रघुवंशे राजस्वरूपम्

आचार्यः चक्रवर्तिरङ्गनाथन्
साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

**सारांशः**- कालिदासस्य काव्येषु राजवैभवं भूरिशः दृश्यते। राज्ञः जीवनं, तस्य कर्तव्यं, तस्य गुणाः च लोकहिताय कथं भवेयुरिति रघुवंशम् आदर्शदर्पणं कृत्वा दर्शयति, तत्र सर्वेपि दिलीपरघुरामतुल्याः भवेमेति लोकपालकानां यथाचिन्तनं स्यात् तथा न्यरुरूपत्। तदत्र यथामति प्रतिपाद्यते।

---

कालिदासः संस्कृतसाहित्ये कविकुलगुरुरिति सर्वैः अभ्युपगतः। तस्य काव्येषु न केवलं काव्यलालित्यम्, उपमालङ्कारवैचित्र्यं च दृश्यते, अपि तु भारतीयराजनीतिशास्त्रस्य, धर्मशास्त्रस्य, सामाजिकमूल्यानां सूक्ष्मं प्रतिबिम्बनम् अपि स्फुटमवलोक्यते। कालिदासस्य कविकुलगुरुता प्रत्येकं पद्ये अनेकार्थगर्भमूला। रघुवंशे रघुराजानां वर्णनं कुर्वता एव कालिदासेन राजपरम्परायाः, राजधर्मस्य, उत्तराधिकारस्य, शासकस्य कर्तव्यबुद्धेश्च विस्तृतं निरूपणं, राज्ञः स्वरूपं, राज्ञः गुणाः, तस्य आवश्यकता, पालनशैली, शरीरपटुता, बुद्धितीक्ष्णता च वर्णिता।

**चरितं मधुरं च वर्णयन् कुलधर्मान्नियतं प्रबोधयन्।**
**कवितां कमनीयया गिरा कथकः कः कविकालिदासतः।।**[1]

रघुवंशः यथेतिहासं वर्णनीयः, तेषां राज्ञां गुणाः धर्माः निरूपणीयाः, लोकः शिक्षणीयः, काव्यदृष्टिरपि रक्षणीया। एवं सकलमकलङ्कतया चकार कालिदासः। कालिदासस्य दृष्टौ राजपदस्य अर्थः भवति-

**यथा प्रह्लादनाच्चन्द्रः प्रतापनात्तपनो यथा।**
**तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्** ।।[2] इति

चदि आह्लादे इति धातोः निष्पन्नः चन्द्रशब्दः, चन्द्रस्तु आह्लादजननादेव चन्द्राभिधेयतां गतः, तपतीति तपनः प्रतापादेव तपनः तपनाभिधेयतां गतः, तुल्यं लोकान् रञ्जयतीत्येव राजा राजेत्यभिधीयते इति सुष्ठु न्यरुरूपत् रघुवंशे। राज्ञः पालनं कथं भवेदिति सुन्दरं कवयति रघुवंशस्य प्रथमसर्गे-

**प्रजानां विनयाधानात् रक्षणाद्भरणादपि।**
**स पिता पितरस्तासां केवलं जन्महेतवः।।**[3]

---

1 प्रसिद्धः
2 रघु. 4.12
3 तत्रैव-1.24

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

रघुराजः पितरौ यथा स्वापत्याय विद्यां रक्षां च प्रदाय रक्षतः, तुल्यं सकलाभ्यः प्रजाभ्यः विद्याभयदानेन स एव पितृकल्पोऽभूत्। जनकौ केवलम् अपत्यजननेन जनकत्वं भजतः इति। अनेन प्रजानाम् अध्यापनं तासां च रक्षणं राज्ञा एव वहनीयमिति समाजोपरि राज्ञः कर्तव्यतां दर्शयति। क्षत्रियशब्दस्यापि अर्थमेवं निरूपयति-

**क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।**

**राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ।।**[4] इति

क्षतात् नाशात् त्रायते इति क्षत्रियः इति निर्वचनं व्याचष्टे। अस्य श्लोकस्य सन्दर्भः इत्थं वर्तते- यदा रघुवंशमहाकाव्यस्य द्वितीये सर्गे सिंहः राजानं दिलीपं स्वस्य रक्षणं कृत्वा नन्दिनी च स्वस्मै भोजनाय दातव्या इति उपदिशति, तदा दिलीपः प्रजानां रक्षणमेव राज्ञः कर्तव्यं, नन्दिन्याः रक्षणमकृत्वा स्वस्य रक्षणे प्रवर्तमानः कीदृशो राजा इति सिंहं प्रति जगर्ज। अनेन स्वराज्यस्य प्रजानां रक्षणे राज्ञः दायित्वं कीयद्वर्ततेति अवगम्यते।

भारतीयपरम्परायां राजा केवलं शासकः न, अपि तु धर्मस्य मूर्तिरूपः इति मन्यते। महाभारते उक्तं यत्- "धर्मेण पालयन् राजा प्रजाः स्वर्गमवाप्नुयात्" इति। एष एव भावः कालिदासकाव्येषु प्रतिध्वनति। रघुवंशे प्रतिपादिताः राजानः पृथिव्याः पालयितारः, प्रजानां पालकाः, स्वधर्मनिष्ठाः च दृश्यन्ते। तेषां राज्यं न स्वार्थाय, किन्तु लोकाय प्रवर्तते।

रघुकुलस्य महत्त्वं कालिदासः विशेषतया दर्शयति। 'कुलक्रमागतं राज्यं' इति तस्य काव्येषु पुनःपुनः दृश्यते। कुलं न केवलं रक्तसम्बन्धः, अपि तु धर्मपरम्परायाः वहनम् अपि भवति। पूर्वजैः आचरितः धर्मः, नीतिः, शौर्यं, दया च उत्तराधिकारिणां जीवनमार्गं निर्देशयन्ति। तस्मात् राजपुत्रः बाल्यादेव राजधर्मे शिक्षितः भवति।

रघुवंशे दिलीपस्य चरिते एषा भावना विशेषतया प्रकाशते। दिलीपः सत्यव्रतः, गुरुभक्तः, प्रजावत्सलः च आसीत्। तस्य जीवनं दर्शयति यत् राजा स्वसुखं त्यक्त्वा प्रजानां हितं चिन्तयेत्। वसिष्ठस्य आदेशेन नन्दिनीसेवां कृत्वा सः स्वार्थत्यागस्य उत्तमम् उदाहरणं ददर्श। एतेन कालिदासः सूचयति यत् राज्ञः प्रजानां सुष्ठु पालनमेव तपः। उत्तराधिकारस्य विषये अपि कालिदासस्य दृष्टिः स्पष्टा। केवलं ज्येष्ठत्वं स्वपुत्रत्वं वा न पर्याप्तम्, अपि तु पात्रता, गुणाः, धर्मनिष्ठा च अपेक्षते उत्तराधिकारित्वाय। अजस्य, दशरथस्य, रामस्य च चरितेषु एषः सिद्धान्तः प्रतिपादितः। रामः युवराजपदे अभिषिक्तुं योग्यः आसीत् यतः सः गुणैः, शीलैः, त्यागेन च समन्वितः। तस्मात् कुलपरम्परा गुणपरम्परया सह एव मूल्यवती भवति।

कालिदासः राजव्यवस्थायां मन्त्रिणां, आचार्याणां, सभायाः च भूमिकां दर्शयति। राजा एकाकी निर्णयं न करोति, अपि तु धर्मज्ञैः सह परामर्शं कृत्वा कार्यं करोति। एषा व्यवस्था राज्यस्य स्थैर्यं वर्धयति। प्रजाहितं सर्वोपरीति भवतीति भावना रघुवंशे सर्वत्र दृश्यते। करग्रहणम् अपि न्याय्येन, आपत्काले करमुक्तिः, दुर्बलानां संरक्षणं च राज्ञः कर्तव्यरूपेण वर्ण्यते।

कालिदासकाव्येषु राज्याधिकारस्य आधारः वंशपरम्परा इति दृश्यते, तथापि तस्य अन्तःसारः गुणप्रधान एव। "ज्येष्ठत्वम्" इति केवलं बाह्यहेतुः, किन्तु "योग्यता" इति आन्तरिकं निर्णायकतत्त्वम् इति कविना सूचितम्। रघुवंशे कुशप्रसङ्गः अस्य विचारस्य प्रत्यक्षं प्रमाणम्। यत्र ज्येष्ठस्य अयोग्यता, कनिष्ठस्य तु गुणसम्पन्नता दृश्यते, तत्र कालिदासः स्पष्टतया गुणाधारितराज्याधिकारस्य समर्थनं करोति। अनेन सः परम्परागतवंशवादस्य सीमां निर्दिश्य नैतिकराजनीतिं प्रतिष्ठापयति।

---

[4] रघुवंशम् - 2- 53

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881; Impact Factor :8.017(2023); IC Value:5.16; ISI Value:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

राजा, कालिदासस्य दृष्ट्या “पिता” इव भवति। प्रजा तस्य पुत्रवत्, राज्यं तस्य कुटुम्बवत्। अयं पितृप्रधानः राज्यविचारः केवलं भावनात्मकः न, अपि तु उत्तरदायित्वप्रधानः। पिता यथा पुत्रस्य हितं स्वसुखात् पूर्वं मन्यते, तथा एव राजा अपि प्रजाहितं स्वार्थात् पूर्वं स्थापयेत्। रघुवंशे दिलीपरघ्वजदशरथादयः राजानः अस्य पितृभावस्य सजीवाः उदाहरणानि भवन्ति।

कालिदासस्य राजदर्शनस्य केन्द्रीयतत्त्वं “धर्मः” एव। राजा धर्मस्य अधिष्ठाता, रक्षकः, प्रवर्तकः च। धर्मेण विना राज्यं न स्थिरं भवितुं शक्नोति इति कालिदासस्य दृढा मान्यता। सः राजानं न केवलं विधिदाता, अपि तु स्वाचारद्वारा धर्मस्य जीवितप्रतिमानं करोति। यथा राजा आचरति, तथा प्रजाः अनुचरन्ति—इति विचारः कालिदासकाव्येषु पुनः पुनः प्रतिध्वनति। स्वसंयमः, इन्द्रियनिग्रहः, न्यायशीलता, क्षमा, दया, त्यागः-एते गुणाः कालिदासस्य आदर्शराज्ञः अनिवार्यलक्षणानि। राजा यदि इन्द्रियासक्तः भवति, तर्हि सः राज्यस्य पतनस्य कारणं भवति। अतो हि कालिदासः राजधर्मस्य मूलं आत्मनिग्रहे एव स्थापयति। अयं विचारः केवलं काव्यात्मकः न, अपि तु शास्त्रीयराजनीतिचिन्तनस्य गभीरः अंशः अस्ति।

राज्यं कालिदासस्य मते भोगस्थानं न, किं तु कर्तव्यभूमिः। तस्य काव्येषु राज्यं यज्ञोपमया निरूपितम्- राजा यजमानः, प्रजाः हविः, धर्मः अग्निः, लोककल्याणं तु यज्ञफलम्। अयं रूपकात्मकविचारः राजसत्तायाः त्यागमूलकस्वरूपं प्रकाशयति। राजत्वम् अधिकारः न, सेवा इति भावः अत्र प्रतिपाद्यते।

स्त्रीराज्याधिकारविषये कालिदासस्य दृष्टिः अपि उल्लेखनीया। यद्यपि सः परम्परागतसामाजिकसंरचनायां स्थितः, तथापि योग्यतायां सत्यां स्त्रीणामपि राज्याधिकारः सम्भवतीति सः अप्रत्यक्षतया स्वीकरोति। एषा दृष्टिः तस्य विचारस्य प्रगतिशीलतां सूचयति, यत् केवलं लिङ्गाधारितराजनीतिं न, अपि तु गुणाधारितराजनीतिं समर्थयति।

अतः कालिदासस्य राजदर्शनं काव्यालङ्कारमात्रे सीमितं न, अपि तु गभीरदार्शनिकराजनीतिकनैतिकचिन्तनस्य समन्वयः अस्ति। सः राजानं लोकजीवनस्य मेरुदण्डमिव पश्यति। राजा यदि धर्मयुक्तः, गुणसम्पन्नः, प्रजावत्सलः च भवति, तर्हि राज्यं स्वयमेव समृद्धिं गच्छति—इति कालिदासस्य अन्तिमः तात्त्विकः निष्कर्षः।

**न्यायप्रियता तथा दण्डनीतिः**

कालिदासः दण्डनीतिं धर्मस्य अधीनां मन्यते। अन्धदण्डः तेन नाङ्गीकृतः। राजा यदा न्यायेन दण्डं प्रयुङ्क्ते, तदा समाजे शान्तिः प्रतिष्ठते। राजा स्वेच्छया न दण्डयेत्, न च पक्षपातं कुर्यात्- दण्डः राज्ञः हस्ते धर्मरक्षणाय अस्त्रं भवति, न तु अत्याचारस्य साधनम्। एतत् कालिदासस्य राजधर्मविषये विशेषं योगदानम्।

**अर्थव्यवस्था तथा लोकसमृद्धिः**

कालिदासदृष्ट्या समृद्धराज्यस्य आधारः सुस्थितः अर्थतन्त्रः। कृषिः, वाणिज्यं, पशुपालनं च राज्यसमृद्धेः कारणानि।
राजा यदा मार्गरक्षणं, व्यापारसुरक्षा, करन्यायं च पालयति, तदा जनाः निर्भयाः भवन्ति।अतः कालिदासः अर्थं धर्मस्य विरोधिनं न मन्यते, अपि तु धर्मस्य सहचरं स्वीकरोति।

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881; Impact Factor :8.017(2023); IC Value:5.16; ISI Value:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

**पर्यावरणसंरक्षणमपि राजधर्मः**

कालिदासः प्रकृतिपूजककविः। तेन राज्यस्य सौन्दर्यं वननदीपर्वतपशुपक्षिसंरक्षणेन सम्बद्धः दर्शितः।
राजा यदि पर्यावरणं न रक्षति, तर्हि राज्ये दुर्भिक्षं, रोगाः, अशान्तिः च भवन्ति।
अतः कालिदासस्य दृष्टौ राजा प्रकृतेः रक्षकः अपि भवति।

राज्ञः धर्मपालनात् जनपदे निर्भयता, समृद्धिः, सौहार्दं च वर्धते। अयं भावः वाल्मीकिना स्पष्टं प्रतिपादितः-

**नाराजके जनपदे प्रविशन्ति समं नराः ।**
**उद्यानानि च रम्याणि हृष्टाः पुष्यन्ति च** ॥[5]इति।

एष एव राजधर्मसम्बद्धः विचारः कालिदासस्य काव्येषु सूक्ष्मतया व्याप्य दृश्यते। राजधर्मेण प्रकृतिसौष्ठवम्। कालिदासस्य दृष्टौ राजा धर्मे स्थितः चेत् प्रकृतिः अपि अनुकूलं वर्तते। वनानि पुष्यन्ति, सरांसि निर्मलानि भवन्ति, क्षेत्रेषु सस्यसमृद्धिः दृश्यते। राज्ञः अधर्मे तु तानि सर्वाणि क्षीयन्ते। अतो राजा केवलं मानवसमाजस्य न, अपि तु पर्यावरणस्यापि नियन्ता भवति। राज्ये सुशासनस्य अभावे उद्यानानि विनश्यन्ति, ग्रामनगरव्यवस्था विपर्यस्यते, जनानां मनसि भयमेव वर्धते। अतः कालिदासः राजानं लोकस्थितेः कारणम् इति भावेन निरूपयति।

**कालिदासाभिप्राये 'आदर्शराजा'**

कालिदासः आदर्शराजानं मनोः परम्परायामेव स्थापयति। स राजा स्वयम् इन्द्रियजययुक्तः, धर्मनिष्ठः, प्रजाहिते निरतः भवति। मनुस्मृतौ वर्णितानि राजगुणाः कालिदासस्य राजकल्पनायां स्पष्टतया प्रतिबिम्बितानि दृश्यन्ते। स्वायम्भुवादिमनवः, स्वारोचिषः, औत्तमः, तामसः, रैवतः, चाक्षुषः, वैवस्वतः इत्यादयः मनवः राजधर्मस्य आदर्शरूपेण स्वीक्रियन्ते।
मनुस्मृतौ-

**प्रजापतिस्तु स्रष्टा मनुरक्षार्थमात्मजाम् ।**
**ब्राह्मणाद्यैः सदाचारैः सर्पवर्णान् महीमिमाम्** ॥[6]

इत्यादिभिः श्लोकैः राजधर्मस्य दैवीयत्वं प्रतिपाद्यते। कालिदासोऽपि एतमेव भावं काव्यात्मकतया स्वीकृतवान्।

**विद्या–राज्ययोः अविनाभावसम्बन्धः**

कालिदासस्य मते विद्यां विना न राजा शोभते। रूपं, कुलं, ऐश्वर्यं सर्वं विद्याया अभावे निष्फलं भवति। अयं भावः तेन काव्येषु पुनः पुनः उद्घोषितः—

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।**

---

[5] वाल्मीकिरामायणम् 3.67.13
[6] मनु.

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

**विद्याहीनाः न शोभन्ते निर्गुणा इव किंशुकाः** ॥[7]इति।

अतः राजा यदि विद्याविहीनः भवति, तदा स राज्यभारं सम्यग् वहितुं न शक्नोति। अत एव कालिदासः राजानं सर्वविद्यापारङ्गतं कर्तुम् इच्छति।

शुकनीतौ अपि उक्तम्—

**आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।**
**विद्याश्चतस्र एतास्तु राज्यस्य सदा हिताः** ॥[8] इति।

कालिदासोऽपि राज्ञः शिक्षायाः, ब्रह्मचर्यस्य, गुरुकुलवासस्य च महत्त्वं स्वीकरोति।

चतुर्दशविद्यास्थानानि च राजा जानीयात्। कालिदासाभिप्राये राजा वेदाङ्गोपनिषदादिविद्यासु, इतिहासपुराणेषु, मीमांसान्यायेषु च निष्णातः भवेत्। शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पः—एतानि वेदाङ्गानि; ऋग्यजुःसामाथर्ववेदाः; मीमांसा, न्यायः, धर्मशास्त्रं, पुराणम्—इत्येतानि चतुर्दशविद्यास्थानानि राज्ञः अनिवार्यज्ञानानि इति भावः स्पष्टः।

**निर्व्यस्सारात्सार्थं कार्यं चिन्तयित्वा गुणान्वितः ।**
**विस्तर्य विद्या परिसंख्यया मे कोटिशो दश चारिताः ॥**

इत्यादिभिः श्लोकैः विद्यायाः राजजीवने महत्त्वं प्रतिपाद्यते।

वैवस्वतमनोः प्रतीकात्मकतया कालिदासेन वैवस्वतमनोः विशेषमहत्त्वं प्रदत्तम्। मनुः वेदवत्, प्राणवत्, पृथ्वीपालकत्वेन च निरूपितः—

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।**
**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव** ॥[9] इति।

अत्र मनुः राज्ञः आदर्शप्रतिरूपम्। स वेदानां प्रवर्तकः, धर्मस्य संरक्षकः, प्रजापालकः च। कालिदासः एतत् प्रतीकं स्वराजदर्शनस्य स्थिरीकरणाय उपयुङ्क्ते। कालिदासः कामन्दक-कौटिल्यादीनां मतेन सह सामञ्जस्यं स्थापयन् चतस्रः विद्याः (आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिः च) राज्ञः कृते अनिवार्याः मन्यते। यद्यपि क्वचित् त्रयाणामेव विद्यानां निर्देशः दृश्यते, तथापि मल्लिनाथादयः व्याख्यातारः मन्यन्ते यत् तत्र 'आन्वीक्षिकी' त्रय्यामेव अन्तर्भूता अस्ति।

राजा सुदर्शनस्य विषये महाकविः लिखतिः-

**स पूर्वजन्मान्तरदृष्टपाराः स्मरन्निव क्लेशकरो गुरूणाम्।**

---

[7] चाणक्यशतकम्-.7

[8] शुकनीतिः.1.152

[9] रघुवंशम् - 1-10

Cover Page

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

**तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥**[10]

अत्र राजा स्वकीयपूर्वजन्मसंस्कारैः विना क्लेशं विद्याः अधीतवान् इति ध्वनितम्। प्रज्ञा-शास्त्र-कर्मणाम् अन्योन्याश्रयत्वम् कालिदासस्य राजदर्शनं "क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे" इति न्यायेन प्रचलति। राज्ञः दिलीपस्य प्रज्ञा तस्य शास्त्रज्ञानस्य अनुगुणम् आसीत्, तस्य आरम्भश्च तस्य बुद्धिसम्मतः आसीत्। अस्मिन् सन्दर्भे अयं श्लोकः उपवर्णितः-

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**

**आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥**[11]

अर्थात् राज्ञः शरीरयष्टिः इव तस्य बुद्धिः विशाला आसीत्, बुद्धेरनुगुणं तस्य शास्त्रज्ञानम् आसीत्, शास्त्रानुसारं सः कार्यम् आरभते स्म, तादृशेन सुव्यवस्थितारम्भेण तस्य सफलता अपि निश्चिता आसीत्।

**राज्ञः दण्डशक्तिः शास्त्रनिष्ठता च**

राज्ञः प्रधानं कार्यं प्रजानां रक्षणं तथा च धर्ममर्यादायाः स्थापनम् अस्ति। मनुना उक्तं यत् यः सत्यवादी, प्रज्ञावान्, धर्मकामार्थकोविदः च भवति, स एव दण्डप्रणयने समर्थः इति। कालिदासः अपि एनमेव विचारं पुष्णाति यत् राज्ञः बुद्धिः शास्त्रेषु अकुण्ठिता भवेत्:

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।**

**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥**[12]

राज्ञः कृते केवलं सैन्यबलं पर्याप्तं नास्ति, अपि तु शास्त्रमर्यादायाम् अप्रतिहता बुद्धिः एव तस्य वास्तविकं शस्त्रं वर्तते इति।

**विद्यानां व्याप्तिः**

रघोः बाल्यावस्थां वर्णयन् कविः कथयति यत् सः वायुवेगेन गच्छता अश्वेन इव चतस्रः विद्याः पारं गतवान्-

**धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुर्णवोपमाः।**

**ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥**[13]

एवम् प्रकारेण कालिदासीये रघुवंशे राजा केवलं शासनकर्ता नास्ति, अपि तु सः आध्यात्मिकलौकिकन्यायवार्तादिषु चतुर्षु अपि क्षेत्रेषु लब्धप्रतिष्ठः मनीषी भवति।

---

10 रघुवंशम्.18.50

11 रघुवंशम्.1.15

12 मनुस्मृतिः.7.16

13 रघुवंशम्.3.30

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

## विनयः विद्यायाः भूषणम्

कालिदासः प्रतिपादयति यत् केवलं पाण्डित्यं राज्ञः कृते पर्याप्तं नास्ति; विद्या विनयेन सहिता भवेत्। यः राजा विनीतस्य भावं धारयति, स एव सुदीर्घकालं पृथिवीं भोक्तुं शक्नोति। रघुवंशे रघोः वर्णनं कुर्वन् कविः कथयति यत् सः महान् पराक्रमी अपि सन् अत्यन्तं विनीतः आसीत्।

तदुक्तं रघुवंशे-

**युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः।**
**वपुः प्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥**[14]

तात्पर्यम् इत्थं रघोः शरीरं अत्यन्तं बलिष्ठं कपाटसदृशं च आसीत्, येन सः पितुः अपि उपरि शोभते स्म, तथापि सः विनयेन सदा नम्रः आसीत्।

## राज्ञः इन्द्रियजयः

राज्ञः सफलतायाः मूलं तस्य इन्द्रियनिग्रहः अस्ति। यः राजा कामक्रोधादीनां आन्तरिकशत्रूणां वशीभूतः भवति, तस्य विनाशः निश्चितः। कालिदासः अग्निवर्णस्य दृष्टान्तेन दर्शयति यत् इन्द्रियसुखे निमग्नः राजा कथं स्वविनाशं करोति। अतः राज्ञा प्रथमं अन्तःशत्रवः जेतव्याः।

अस्मिन् विषये महाकविः लिखति-

**अनित्या शत्रवो बाह्याः विप्रकृष्टाश्च ते यतः।**
**अतः सोऽभ्यन्तरान्नित्यानष्टपूर्वमजयद्रिपून ॥**[15]

तात्पर्यम्: बाह्याः शत्रवः अनित्याः दूरे च भवन्ति, किन्तु अन्तःस्थिताः कामक्रोधादयः शत्रवः नित्याः विनाशकाश्च सन्ति। अतः श्रेष्ठः राजा प्रथमं तान् एव जयति।

## शास्त्रानुसारि शासनम्

राज्ञः निर्णयः तर्कमात्रेण न, अपि तु शास्त्रमर्यादया भवेत्। दिलीपस्य शासनकाले तस्य बुद्धिः शास्त्रेषु अकुण्ठिता आसीत्। सः न केवलं प्रजानां रक्षकः आसीत्, अपि तु धर्मशास्त्रज्ञः अपि आसीत्।

यथा रघुवंशे-

**सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।**
**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥**[16]

---

[14] रघुवंशम्3.34

[15] रघुवंशम्.17.45

[16] मनुस्मृतिः.7.16

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

तात्पर्यं भवति तस्य राज्ञः (दिलीपस्य) कार्याणां सिद्धये द्वयमेव प्रधानं साधनम् आसीत् - शास्त्रेषु तस्य तीक्ष्णा बुद्धिः तथा च धनुषि आरोपिता प्रत्यञ्चा।

**निष्कर्षतः-** कालिदासीयदर्शने राजत्वं नाम केवलं सत्ताभोगः नास्ति, अपि तु तत् शास्त्रनिष्ठायाः, विनयस्य, इन्द्रियजयस्य च एकं कठिनं तपः अस्ति। विद्या विनयेन सहिता चेदेव फलवती भवति। कालिदासः प्रतिपादयति यत् 'अविनीतः' राजा कदापि प्रजानां रञ्जने समर्थः न भवति। रघोः वर्णने सः कथयति यत् सः विशालकायः पराक्रमी च सन् अपि विनयात् नीचैः दृश्यते स्म। इतोऽपि च, इन्द्रियजयः राज्यमूलत्वेन स्वीकृतः यः राजा स्वमनः निग्रहीतुं न शक्नोति, सः चतुरङ्गवतीं पृथिवीं जेतुं न प्रभवति। महाकविः अग्निर्णस्य वृत्तान्तेन दर्शयति यत् यदा राजा प्रजाकार्यं विहाय केवलं विषयेषु रतः भवति, तदा तस्य विनाशः निश्चितः।

**अनित्या शत्रवो बाह्याः विप्रकृष्टाश्च ते यतः।**
**अतः सोऽभ्यन्तरान्नित्यानष्टपूर्वमजयद्रिपून ॥**[17]

**राजकुलस्य संस्काराः**

कालिदासीयदर्शने आदर्शपुत्रस्य प्राप्तेः मूलं संस्काराः सन्ति। सः रघुवंशे पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणादि-संस्काराणां शास्त्रीयं महत्त्वं निरूपयति। गर्भसंस्कारः: गर्भिण्याः राजमहिष्याः इच्छा (दोहदं) शास्त्रानुसारं पूरणीया, येन गर्भस्थः शिशुः सकलगुणसम्पन्नः भवेत्।

जातकर्म कुमारस्य जन्मकाले राजपुरोहितेन (यथा वसिष्ठेन) क्रियमाणः जातकर्मसंस्कारः तस्य मेधां, बलं, आयुष्यं च वर्धयति।

इत्थं च अत्र रघुवम्शदिशा राजस्वरूपं यथामति निरूपितम्

**ग्रन्थसूची** -

1. रघुवंशम्- राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः.
2. मनुस्मृतिः, मनुः, चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी, १९८५.
3. अग्निपुराणम्, आचार्यः श्रीबलदेवोपाध्यायः, चौखम्बा संस्कृत संस्थान, वाराणसी, १९९८.
4. अष्टादशस्मृतिः, पं. मिहिरचन्द्र, नागप्रकाशक, दिल्ली, २००५.
5. कौटिलीयार्थशास्त्रम्, कौटिल्यः, मेहरचन्द लछमनदास पब्लिकेशन्, नई दिल्ली, २००१.
6. गौतमधर्मसूत्राणि, गौतमः, चौखम्बा संस्कृत संस्थान, वाराणसी, २००५.
7. चाणाक्यसूत्रम्, चाणाक्यः, दिल्ली संस्कृत अकादमी, २००८.
8. नारदस्मृतिः, डा. व्रजकिशोर स्वाई, चौखम्बा संस्कृत भवन, वाराणसी, १९९६.
9. नीतिसारः कामन्दकीयः, टि. गणपतिशास्त्री, तिरुवनाङ्कर् गवर्नमेन्ट प्रेस्, त्रिवेन्ड्रम्, १९१२.

[17] रघु.17.45

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:8(4), August: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd August 2023
Publication Date:30th August 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2023/12.08.80.2
www.ijmer.in

10. पञ्चतन्त्रम्, श्रीविष्णुशर्मा, चौखम्बा विद्याभवन, वाराणसी, २००२.

11. बौधायनधर्मसूत्रम्, चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी, १९७२.

12 याज्ञवल्क्यस्मृतिः, डा.गडाधर राय्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००७.

13.रघुवंशम्, सञ्जीविनी, सुधा, इन्दुव्याख्योपेतम्, चौखम्बा, संस्कृत संस्थान, वाराणसी.

14शुक्रनीतिः, शुक्राचार्यः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९८.